**26/2024**

Roll No. | | | | | | | | |

(Write Roll Number from left side exactly as in the Admit Card)

*Signature of Invigilator*

**Question Booklet Series** **X**

**PAPER–II** **Question Booklet No.**

**Subject Code : 03**

# SANSKRIT

*Time : 2 Hours* *Maximum Marks: 200*

***Instructions for the Candidates***

1. Write your Roll Number in the space provided on the top of this page as well as on the OMR Sheet provided.
2. At the commencement of the examination, the Question Booklet will be given to you. In the first 5 (five) minutes, you are requested to open the booklet and verify it:
   (i) To have access to the Question Booklet, tear off the paper seal on the edge of this cover page.
   (ii) Faulty booklet, if detected, should be got replaced immediately by a correct booklet from the invigilator within the period of 5 minutes. Afterwards, neither the Question Booklet will be replaced nor any extra time will be given.
   (iii) Verify whether the Question Booklet Number is identical with OMR Sheet Number; if not, the full set is to be replaced.
   (iv) After this verification is over, the Question Booklet Series and Question Booklet Number should be entered on the OMR Sheet.
3. This paper consists of One Hundred (100) multiple-choice type questions. All the questions are compulsory. Each question carries *two* marks.
4. Each Question has four alternative responses marked: (A) (B) (C) (D). You have to darken the circle as indicated below on the correct response against each question.
   *Example:* (A) (B) ● (D), where (C) is the correct response.
5. Your responses to the questions are to be indicated correctly in the OMR Sheet. If you mark your response at any place other than in the circle in the OMR Sheet, it will not be evaluated.
6. Rough work is to be done at the end of this booklet.
7. If you write your Name, Phone Number or put any mark on any part of the OMR Sheet, except in the space allotted for the relevant entries, which may disclose your identity or use abusive language or employ any other unfair means, such as change of response by scratching or using white fluid, you will render yourself liable to disqualification.
8. Do not tamper or fold the OMR Sheet in any way. If you do so, your OMR Sheet will not be evaluated.
9. You have to return the Original OMR Sheet to the invigilator at the end of the examination compulsorily and must not carry it with you outside the Examination Hall. You are, however, allowed to carry question booklet and duplicate copy of OMR Sheet after completion of examination.
10. **Use only Black Ball point pen.**
11. **Use of any calculator, mobile phone, electronic devices/gadgets etc. is strictly prohibited.**
12. **There is no negative marks for incorrect answer.**

***परीक्षार्थिनां कृते निर्देशावली***

1. एतत्पत्रोपरि समं च प्रदत्ते OMR-पत्रमध्ये निर्दिष्टस्थले भवत:/भवत्या क्रमसंख्या लेख्या।
2. परीक्षारम्भे प्रश्नपुस्तिका भवते/भवत्यै प्रदास्यते। प्रथमनिमेषपञ्चके पुस्तिकामुद्घाटयितुं तथा एतस्य याथार्थ्यं परीक्षितुं भवान्/भवती अनुरुध्यते।
   (a) प्रश्नपुस्तिकाभ्यन्तरं द्रष्टुम् एतत्प्रच्छदपत्रस्य प्रान्तभागोपरिस्थिता पत्रमुद्रा छेदनीया।
   (b) त्रुटियुक्ता पुस्तिका दृष्टा चेत् परीक्षानिरीक्षकात् प्राप्तया शुद्धपुस्तिकया अविलम्बेन पञ्चनिमेषमध्ये सा प्रतिस्थापनीया। ततः परं प्रश्नपुस्तिकाप्रतिस्थापनं न भवेत्, नापि च अतिरिक्त: समय: प्रदास्यते।
   (c) प्रश्नपुस्तिकासंख्या OMR-उत्तरपत्रसंख्यानुरूपा न वेति परीक्षणीयम्। न चेत् सम्पूर्ण: गुच्छ: प्रतिस्थापनीय:।
   (d) यथार्थतापरीक्षावसाने प्रश्नपुस्तिकाश्रेणीसंख्या तथा प्रश्नपुस्तिकासंख्या OMR-पत्रमध्ये निवेशनीया।
3. पत्रमिदं शतसंख्यकबहुचयनीयविकल्पोत्तरकप्रश्नसमन्वितम्। सर्वे प्रश्ना: अवश्यमुत्तरणीया:। प्रत्येकं प्रश्न: अङ्कद्वयमानक:।
4. प्रत्येकं प्रश्नस्य चत्वार: उत्तरविकल्पा: सन्ति। ते हि (A) (B) (C) (D) इत्येवं चिह्निता:। प्रत्येकं प्रश्नस्य कृते शुद्धोत्तरसमन्वितं वृत्तम् अधोदर्शितरीत्या कृष्णीकर्तव्यम्। उदाहरणम्: (A) (B) ● (D), यत्र (C) इति शुद्धोत्तरम्।
5. प्रतिप्रश्नं भवदुत्तरं यथायथतया OMR-पत्रमध्ये निर्देष्टव्यम्। OMR-पत्रमध्ये निर्दिष्टवृत्तमतिरिच्य अन्यत्र कुत्रापि भवदुत्तरं निधीयते चेत् तत् परीक्षार्थं विवेचितं न स्यात्।
6. आवश्यकत्वे सति उत्तरस्य स्थूलरूपनिर्माणानुकूलं कार्यं पुस्तिकाया: अन्तिमभागे विधातव्यम्।
7. प्रासङ्गिकतथ्योल्लेखाय निर्दिष्टं स्थानं विहाय OMR-पत्रमध्ये अन्यत्र कुत्रापि भवत:/भवत्या: नाम दूरभाषसंख्या अन्यत् वा किमपि भवत्परिचयप्रकाशकं चिह्नं भवता/भवत्या निधीयते चेत्, निन्दनीया भाषा वा प्रयुज्यते चेत्, नखघर्षणेन श्वेतद्रवेण वा उत्तरपरिवर्तनम् इत्येवंरूप: कोऽप्यन्य: असदुपाय: वा उपयुज्यते चेत् भवान्/भवती स्वयमेव स्वायोग्यतां सूचयिष्यति।
8. OMR-पत्रं न कथमपि विकर्तव्यं नापि वा भङ्ग्या पुटीकर्तव्यम्। एवं क्रियते चेत् भवत:/भवत्या: OMR-पत्रं न परीक्षिष्यते।
9. परीक्षावसाने भवता/भवत्या अवश्यमेव भवदीयं प्रकृतं OMR-पत्रं परीक्षानिरीक्षकाय प्रत्यर्पणीयम्। परीक्षाप्रकोष्ठात् बहिस्तु तद् आत्मना सह नैव नेतव्यम्। परं परीक्षासमाप्तेरनन्तरं प्रश्नपुस्तिकां तथा OMR-पत्रस्य प्रतिलिपिं नेतुमनुमतिरस्ति।
10. **केवलं वर्तुलाग्रा कृष्णमसि: लेखनी उपयोक्तव्या।**
11. **गणकयन्त्रम्, दूरभाषयन्त्रम्, यत् किमपि वैद्युतिकयन्त्रम् इत्यादे: उपयोग: कठोरतया प्रतिषिद्ध:।**
12. असदुत्तरहेतो: अङ्कवियोजननीतिर्नास्ति।

**The Question Booklet is encrypted with QR code for security reason.**

## Sanskrit

1. ''स देवाँ एह वक्षति''– इत्यत्र 'वक्षति' इति लृट् कस्मिन्नर्थे?
   (A) लडर्थे
   (B) लोडर्थे
   (C) लिडर्थे
   (D) लेडर्थे

2. किं वेदाङ्गं वेदपुरुषस्य श्रोत्रम्?
   (A) निरुक्तम्
   (B) छन्दः
   (C) व्याकरणम्
   (D) शिक्षा

3. जन्माद्यधिकरणस्य विषयवाक्यं कस्यामुपनिषदि वर्तते?
   (A) छान्दोग्योपनिषदि
   (B) बृहदारण्यकोपनिषदि
   (C) कठोपनिषदि
   (D) तैत्तिरीयोपनिषदि

4. शक्वरी–छन्दसि कियन्ति अक्षराणि भवन्ति?
   (A) 52 (द्विपञ्चाशत्)
   (B) 54 (चतु:पञ्चाशत्)
   (C) 56 (षट्पञ्चाशत्)
   (D) 58 (अष्टपञ्चाशत्)

5. ऋग्वेदस्य विषयो भवति–
   (A) इज्या
   (B) स्तुतिस्तोमः
   (C) प्रायश्चित्तम्
   (D) शस्त्रम्

6. ''दैवतब्राह्मणम्'' इति केन वेदेन सम्बद्धम्?
   (A) ऋग्वेदेन
   (B) यजुर्वेदेन
   (C) सामवेदेन
   (D) अथर्ववेदेन

7. 'यज्ञस्य देवम् ऋत्विजम्' इति मन्त्रांशः कस्मिन् सूक्ते प्राप्यते?
   (A) वाक्सूक्ते
   (B) अग्निसूक्ते
   (C) हिरण्यगर्भसूक्ते
   (D) पृथिवीसूक्ते

8. 'यम-यमीसम्वादः' ऋग्वेदस्य कस्मिन् मण्डले वर्तते?
   (A) दशममण्डले
   (B) अष्टममण्डले
   (C) एकादशमण्डले
   (D) नवममण्डले

9. महर्षिपतञ्जलिमते अथर्ववेदे कति शाखाः सन्ति?
   (A) सप्त
   (B) नव
   (C) दश
   (D) द्वादश

10. 'रामः पठति' अत्र सत्त्वप्रधानम् अस्ति
   (A) पठति
   (B) रामः
   (C) रामः पठति
   (D) कोऽपि नास्ति

**11.** दर्शपूर्णमासयागः __________ यागानां समुच्चयः अस्ति।

(A) षड्

(B) सप्त

(C) दश

(D) पञ्चदश

**12.** अग्निविद्याविवेचकः उपनिषद्ग्रन्थः

(A) कठोपनिषद्

(B) छान्दोग्योपनिषद्

(C) ईशावास्योपनिषद्

(D) श्वेताश्वतरोपनिषद्

**13.** 'यज्जाग्रतो दूरमुदैति दैवं'– इति मन्त्रेण सम्बद्धं सूक्तम्

(A) शिवसंकल्पसूक्तम्

(B) आप्रीसूक्तम्

(C) हिरण्यगर्भसूक्तम्

(D) नासदीयसूक्तम्

**14.** ऋग्वेदस्य 'ऋत्विक्' अस्ति

(A) अध्वर्युः

(B) होता

(C) उद्गाता

(D) ब्रह्मा

**15.** शांखायनशाखा–सम्बद्धः वेदः

(A) शुक्लयजुर्वेदः

(B) कृष्णयजुर्वेदः

(C) ऋग्वेदः

(D) सामवेदः

**16.** 'आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च'– इति मन्त्रेण कः सम्बद्धः?

(A) विष्णुः

(B) अग्निः

(C) वरुणः

(D) सविता

**17.** यास्कमतेन वैदिकपदं कतिविधम् ?

(A) द्विविधम्

(B) चतुर्विधम्

(C) षड्विधम्

(D) अष्टविधम्

**18.** रक्तसंज्ञकाः भवन्ति

(A) यमाः

(B) सोष्माः

(C) अनुनासिकाः

(D) अघोषाः

**19.** पञ्चमहायज्ञेषु परिगणितः नास्ति

(A) ब्रह्मयज्ञः

(B) पितृयज्ञः

(C) देवयज्ञः

(D) प्रेतयज्ञः

**20.** जैमिनीयब्राह्मणस्य नामान्तरमस्ति

(A) वंशब्राह्मणम्

(B) षड्विंशब्राह्मणम्

(C) तवलकारब्राह्मणम्

(D) कपिष्ठलब्राह्मणम्

**21.** वेदान्तसारमते अनिर्वचनीयं भवति
(A) जीवः
(B) जगत्
(C) ईश्वरः
(D) अज्ञानम्

**22.** सांख्यमते पङ्गुवद् वर्त्तते
(A) प्रकृतिः
(B) अन्तःकरणम्
(C) गुणत्रयम्
(D) पुरुषः

**23.** सांख्यमते शारीरिकदुःखम्
(A) आत्मिकम्
(B) आध्यात्मिकम्
(C) आधिभौतिकम्
(D) आधिदैविकम्

**24.** प्रत्ययसर्गः कतिविधः?
(A) नवविधः
(B) शतविधः
(C) त्रिविधः
(D) पञ्चाशद्विधः

**25.** सांख्यमते अकर्तृत्वं कस्य स्वरूपम्?
(A) प्रकृतेः
(B) पुरुषस्य
(C) बुद्धेः
(D) अहंकारस्य

**26.** सांख्यमते सत्त्वगुणस्य स्वभावः
(A) सुखात्मकः
(B) दुःखात्मकः
(C) मोहात्मकः
(D) चलनात्मकः

**27.** घटः स्वगतरूपादेः
(A) असमवायिकारणम्
(B) समवायिकारणम्
(C) निमित्तकारणम्
(D) न कारणम्

**28.** अधोलिखितेषु का प्रमा न भवति?
(A) प्रमितिः
(B) उपमितिः
(C) स्वप्नः
(D) अनुमितिः

**29.** निमित्तकारणस्य किमुदाहरणम्?
(A) घटं प्रति दण्डः
(B) घटं प्रति कपालम्
(C) घटं प्रति दण्डरूपम्
(D) घटं प्रति कपालकपालिकासंयोगः

**30.** ध्वन्यात्मकः शब्दो दृश्यते
(A) संस्कृतभाषादिषु
(B) पर्वते
(C) जले
(D) भेर्यादौ

**31.** 'एकस्मिन् धर्मिणि विरुद्ध–नानाधर्मावगाहिज्ञानम्' इति लक्षणं भवति–

(A) अज्ञानस्य

(B) समूहालम्बनज्ञानस्य

(C) संशयस्य

(D) शाब्दज्ञानस्य

**32.** प्रकृतेः अनुपलब्धिः कस्मात्?

(A) सौक्ष्म्यात्

(B) अभावात्

(C) कार्यात्

(D) अचेतनत्वात्

**33.** जैनमते आस्रवनिरोधः कः?

(A) बन्धः

(B) जीवः

(C) अनुभवः

(D) संवरः

**34.** सांख्यमते रूपस्य विकृतिः अस्ति

(A) जलम्

(B) अग्निः

(C) वायुः

(D) पृथिवी

**35.** सांख्यमते आकाशस्य प्रकृतिरस्ति

(A) शब्दतन्मात्रा

(B) रूपतन्मात्रा

(C) रसतन्मात्रा

(D) गन्धतन्मात्रा

**36.** जृम्भणकरः उच्यते

(A) धनञ्जयः

(B) देवदत्तः

(C) कृकलः

(D) नागः

**37.** न्यायसिद्धान्तमुक्तावल्यनुसारं पक्षता कीदृशः पदार्थः?

(A) द्रव्यम्

(B) गुणः

(C) समवायः

(D) अभावः

**38.** तद्वति तत्प्रकारकोऽनुभवो यथार्थः। यथार्थानुभवश्च प्रमेत्युच्यते। इयं प्रमा समवायेन कुत्र वर्तते?

(A) तद्वति

(B) तत्प्रकारे

(C) तत्प्रकारकानुभवे

(D) तत्प्रकारकानुभववति

**39.** "कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणमसमवायि कारणम्" इत्यत्र 'कारणेन' इत्युक्ते कीदृशकारणेनेति बोध्यते?

(A) कार्यस्य कारणेन

(B) स्वस्य कारणेन

(C) कार्यस्य स्वस्य च कारणेन

(D) स्वकार्येतरकार्यकारणेन

**40.** "असदकरणात्......... सत् कार्यम्"– इत्यत्र प्रतिपाद्य–स्यानुमानस्याकारः कीदृशः?

(A) कार्यम् असद् अकरणात्

(B) कार्यं सत् करणात्

(C) कार्यं सद् असदकरणात्

(D) कार्यम् असत् करणात्

**41.** ''अथातो ब्रह्मजिज्ञासा'' इत्यत्र अथेत्यस्यार्थः कः? शाङ्करभाष्यानुसारं युक्तमुत्तरं चयनीयम्।

(A) मङ्गलम्

(B) गुरुसमीपगमनादनन्तरम्

(C) वेदाध्ययनादनन्तरम्

(D) साधनसम्पत्त्यनन्तरम्

**42.** ''सुः पूजायाम्'' इत्यत्र ''अव्ययादाप्सुपः'' इत्यनेन सुरिति सोर्लोपः कथं न?

(A) इह सोरनव्ययत्वात्

(B) निपातनात्

(C) लोपापवादशास्त्रसत्त्वात्

(D) ''अव्ययादाप्सुपः'' इत्यस्य बाहुल्यात्

**43.** अव्ययीभावसमासविषये अध उल्लिखितेषु मतेषु किं शुद्धम्?

(A) पूर्वपदमवश्यमव्ययं भवेत्

(B) उत्तरपदमवश्यमव्ययं भवेत्

(C) पूर्वोत्तरपदयोः किमप्येकमवश्यमव्ययं भवेत्

(D) पूर्वोत्तरपदयोरेकमपि अव्ययं नापि भवेत्

**44.** ''पारे मध्ये षष्ठ्या वा'' इत्यत्र ''पारे मध्ये'' इति पदद्वयं किं विभक्तिकम्?

(A) सप्तम्यन्तम्

(B) द्वितीयान्तम्

(C) प्रथमान्तम्

(D) चतुर्थ्यन्तम्

**45.** ''लक्षणेनाभिप्रती आभिमुख्ये'' इत्यत्र प्रकृतिभावः किमर्थम्?

(A) यण्सन्धेः बाहुल्यात्

(B) निपातनात्

(C) ईकारस्य प्लुतत्वात्

(D) ईकारस्य प्रगृह्यत्वात्

**46.** ''आख्यातोपयोगे'' इत्यस्य वाच्यपरिवर्तने (प्रयोगपरिवर्तने) किं रूपं स्यात्?

(A) आख्यातेनोपयोगे

(B) आख्यात्रोपयोगे

(C) आख्यातयोपयोगे

(D) आख्यात्रेणोपयोगे

**47.** 'अपवर्गे तृतीया' इत्यनेन या तृतीया विधीयते तद्द्वारा किं बोध्यते?

(A) केवलम् अत्यन्तसंयोगः

(B) केवलम् अपवर्गः

(C) अत्यन्तसंयोगः न बोध्यते

(D) अपवर्गः अत्यन्तसंयोगश्चेत्युभयं बोध्यते

**48.** समुद्रगुप्तस्य 'भारतदिग्विजयः' कस्मिन् शिलालेखे वर्तते?

(A) मन्दसोरशिलालेखे

(B) गिरनारशिलालेखे

(C) एहोलशिलालेखे

(D) एलाहावादशिलालेखे

**49.** अशोकस्य शिलालेखानां भाषा का अस्ति?

(A) अपभ्रंशः

(B) संस्कृतम्

(C) अवेस्ता

(D) प्राकृतम्

**50.** 'हिमवतो गङ्गा प्रभवति' इत्यत्र किं सूत्रं प्रवर्तते?

(A) धारेरुत्तमर्णः

(B) पराजेरसोढ़ः

(C) जनिकर्तुः प्रकृतिः

(D) भुवः प्रभवः

**51.** 'भोजनकाले उपतिष्ठते' इत्यत्र आत्मनेपदविधायकं सूत्रं किम्?

(A) समवप्रविभ्य: स्थ:

(B) उदोऽनूर्ध्वकरणे

(C) उपान्मन्त्रकरणे

(D) अकर्मकाच्च

**52.** ''सुपात्'' इत्यत्र क: समास:?

(A) तत्पुरुष:

(B) द्वन्द्व:

(C) बहुव्रीहि:

(D) अव्ययीभाव:

**53.** 'गोपी' इत्यत्र ङीष् केन सूत्रेण?

(A) वयसि प्रथमे

(B) इतो मनुष्यजाते:

(C) पुंयोगादाख्यायाम्

(D) जातेरस्त्रीविषयादयोपधात्

**54.** वाक्यभेदेषु परिगणितं नास्ति

(A) आकृतिमूलकम्

(B) रचनामूलकम्

(C) अर्थमूलकम्

(D) द्रव्यमूलकम्

**55.** 'क' कारस्य घोषरूपमस्ति

(A) ख्

(B) स्

(C) द्

(D) ग्

**56.** ग्रीम-नियमानुसारेण भारतीय-'ग' कारस्य परिवर्तितं जर्मनरूपमस्ति

(A) क्

(B) ग्

(C) ख्

(D) भ्

**57.** गुण-संज्ञा केन सूत्रेण भवति?

(A) आद् गुण:

(B) अदेङ् गुण:

(C) अतो गुणे

(D) सार्वधातुकार्धधातुकयो:

**58.** 'तच्छिव:' इत्यत्र छत्वं केन सूत्रेण भवति?

(A) स्तो: श्चुना श्चु:

(B) छ च

(C) शश्छोऽटि

(D) छे च

**59.** 'उपैति' इत्यत्र वृद्धिविधायकं सूत्रम्–

(A) वृद्धिरेचि

(B) वृद्धिरादैच्

(C) एत्येधत्यूठ्सु

(D) वृद्धिर्यस्याचामादिस्तद्वृद्धम्

**60.** व्यधिकरणबहुव्रीहिसमासे किं ज्ञापकम्?

(A) 'अनेकमन्यपदार्थे'– इत्यत्र 'अनेक'-ग्रहणम्

(B) 'हलदन्तात् सप्तम्या: संज्ञायाम्' इत्यत्र 'संज्ञायाम्' इति ग्रहणम्

(C) 'सप्तमी विशेषणे बहुव्रीहौ' इत्यत्र सप्तमीत्यस्य ग्रहणम्

(D) 'शेषो बहुव्रीहि:' इत्यत्र 'शेष:'-ग्रहणम्

**61.** उपपदसंज्ञाविधायकं सूत्रं किम्?

(A) कर्मण्यण्

(B) उपपदमतिङ्

(C) तत्रोपपदं सप्तमीस्थम्

(D) कुगतिप्रादय:

**62.** सर्वनामस्थानसंज्ञकं सूत्रं किम्?

(A) सर्वादीनि सर्वनामानि

(B) सर्वनामस्थाने चासम्बुद्धौ

(C) सुडनपुंसकस्य

(D) स्वादिष्वसर्वनामस्थाने

**63.** समासशास्त्रे प्रथमानिर्दिष्टं किं भवति?

(A) उपसर्ग:

(B) अव्ययम्

(C) उपसर्जनम्

(D) प्रातिपदिकम्

**64.** 'पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन।।'
अस्या: कारिकाया: सम्बन्ध: केन सिद्धान्तेन सह भवितुमर्हति?

(A) ध्वनिवादेन

(B) स्फोटवादेन

(C) व्यञ्जनावादेन

(D) लक्षणावादेन

**65.** 'अच्च घे:'– इति सूत्रस्य उदाहरणं किम्?

(A) हरे:

(B) हर्यो:

(C) हरौ

(D) हरय:

**66.** 'वान्तो यि प्रत्यये' इत्यत्र 'यि' इत्यस्य कोऽर्थ:?

(A) यिनामके

(B) यकारे

(C) यकारादौ

(D) यकारान्ते

**67.** 'मोऽनुस्वार:' इत्यस्य वाच्यपरिवर्तने (प्रयोगपरिवर्तने) किं रूपं स्यात्?

(A) मेनानुस्वारेण

(B) मोऽनुस्वारेण

(C) मेनानुस्वार:

(D) मोऽनुस्वार:

**68.** ''सूर्याश्वैर्मसजस्तता:सगुरव:शार्दूलविक्रीडितम्''इत्यत्र ''सूर्याश्वै:'' इति पदस्य कीदृगर्थोऽत्र शाब्दबोधे ग्राह्य:?

(A) शक्यार्थ:

(B) लक्ष्यार्थ:

(C) व्यङ्ग्यार्थ:

(D) प्रागुक्तसर्वविधोऽर्थ:

**69.** ''म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्'' इत्यत्र 'म्रभ्नै:' इति समासस्य विग्रह: कीदृश:?

(A) मश्च रश्च भश्च नश्च

(B) मश्च र् च भ् च नश्च

(C) म् च र् च मश्च नश्च

(D) म् च रश्च भ् च नश्च

**70.** ''गच्छति पुर: शरीरं धावति पश्चादसंस्थितं चेत:। चीनांशुकमिव केतो: प्रतिवातं नीयमानस्य'' इत्यत्र शरीरस्य उपमानं किम्? कश्च तयो: साधारणधर्म:?

(A) उपमानं चीनांशुकं साधारणधर्मश्च गच्छति

(B) उपमानं चीनांशुकं साधारणधर्मश्च धावति

(C) उपमानं केतो: साधारणधर्मश्च धावनम्

(D) उपमानं केतु: साधारणधर्मश्च गमनम्

**71.** ''स किंसखा साधु न शास्ति योऽधिपं
हितान्न यः संशृणुते स किम्प्रभुः।'' इति पक्षे ध्वन्यर्थः कः?

(A) मया यदेवोच्यते भवता तदविचार्य श्रोतव्यम्

(B) भवान् न शृणोति चेन्मया न वक्तव्यम्

(C) मया हितमुच्यते भवता च तत् श्रोतव्यम्

(D) मया यदि अहितमुच्यते भवता तन्न श्रोतव्यम्

**72.** ''यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं ........'' इत्यादि पद्यानुसारं यक्षः कुत्र वसतिं चक्रे?

(A) तरुषु

(B) उदकेषु

(C) उदकेषु तरुषु च

(D) तत्तद्विशिष्टेषु

**73.** ''अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्'' इत्यत्र 'अतादृशि व्यङ्ग्ये' 'गुणीभूतव्यङ्ग्यम्' इत्यनयोर्द्वयोर्येन केनचिदेनैव सिद्धे द्वयोरेवोपादानं किमर्थम्?

(A) अतादृशि व्यङ्ग्ये इत्युक्तेऽपि गुणीभूतव्यङ्ग्य-त्वाभावे मध्यमत्वाभावात्

(B) गुणीभूतव्यङ्ग्यत्वे सत्यपि अतादृग्व्यङ्ग्यत्वाभावे मध्यमत्वाभावात्

(C) एकस्य लक्षणत्वादपरस्य च लक्ष्यनामत्वात्

(D) स्पष्टताविधानार्थम्

**74.** ''काले वारिधराणामपतितया नैव शक्यते स्थातुम्।
उत्कण्ठितासि तरले न हि न हि सखि पिच्छिलः पन्थाः।।''
इत्यत्र अपह्नुत्युदाहरणे उपमानोपमेययोः कीदृशं सादृश्यमस्ति?

(A) वारिधरकाले पैच्छिल्यम्

(B) वारिधरकाले समानपदप्रतिपाद्यत्वेन घटमानत्वम्

(C) वारिधरकाले समानपदप्रतिपाद्यत्वेन पतितत्वम्

(D) वारिधरकाले समानपदप्रतिपाद्यत्वेन अपतितत्वम्

**75.** ''शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्'' इत्यत्र 'अव्यङ्ग्यम्' इत्यस्यार्थः कः?

(A) न व्यङ्ग्यम्

(B) न व्यङ्ग्यः

(C) अविद्यमानं व्यङ्ग्यम्

(D) अविद्यमानः व्यङ्ग्यः यस्मिन्

**76.** अनुप्रासः कस्यां वक्रतायामन्तर्भवति?

(A) रूढ़िवक्रतायाम्

(B) पदवक्रतायाम्

(C) प्रत्ययवक्रतायाम्

(D) वर्णविन्यासवक्रतायाम्

**77.** ध्वन्यालोकानुसारं 'तमर्थमवलम्बन्ते' इत्यत्र तच्छब्देन विवक्षितोऽर्थः कः?

(A) प्रसिद्धः

(B) शब्दः

(C) रसः

(D) स्थायी

**78.** सामान्येन विशेषस्य विशेषेण सामान्यस्य वा कीर्तनं कस्मिन् अलङ्कारे भवेत्?

(A) अर्थान्तरन्यासे

(B) अनन्वये

(C) दीपके

(D) रूपके

**79.** अभिज्ञानशाकुन्तले वेत्रवतीति कस्य नामधेयम्?

(A) अप्सरसः

(B) चेट्याः

(C) ऋषिपत्न्याः

(D) प्रतीहार्याः

**80.** ''नलचम्पूः'' अस्य ग्रन्थस्य कर्ता कः?

(A) त्रिविक्रमभट्टः

(B) त्रिविक्रमदाशः

(C) त्रिविक्रममिश्रः

(D) त्रिविक्रमदीक्षितः

**81.** 'चम्पूरामायणम्' केन विरचितम्?

(A) पण्डितराजेन

(B) भोजराजेन

(C) अश्वघोषेण

(D) क्षेमेन्द्रेण

**82.** शाकुन्तलनाटके विदूषकः भवति–

(A) मैत्रेयः

(B) वसन्तकः

(C) माधव्यः

(D) कुसुमाकरः

**83.** 'लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः'– अत्र कोऽलंकारः?

(A) निदर्शना

(B) अतिशयोक्तिः

(C) अप्रस्तुतप्रशंसा

(D) उत्प्रेक्षा

**84.** भवभूतेः काव्यशैली अस्ति

(A) वैदर्भी

(B) गौड़ी

(C) वैदर्भी–गौड़ी च

(D) पाञ्चाली

**85.** प्रथमनाट्यप्रयोगः कदा अभवत्?

(A) इन्द्रध्वजमहोत्सवे

(B) देवासुरसंग्रामे

(C) पारिजातमहोत्सवे

(D) दीपमालिकामहोत्सवे

**86.** कादम्बर्याः सहचरी अस्ति

(A) मदलेखा

(B) पत्रलेखा

(C) चित्रलेखा

(D) चन्द्रलेखा

**87.** 'शिशुपालवधम्' इति महाकाव्यस्य नायकः कः?

(A) शिशुपालः

(B) अर्जुनः

(C) श्रीकृष्णः

(D) युधिष्ठिरः

**88.** मेघदूते जह्नुकन्या का?

(A) नर्मदा

(B) गङ्गा

(C) रेवा

(D) निर्विन्ध्या

**89.** भुक्तिवादं स्वीकरोति

(A) भट्टनायकः

(B) शङ्कुकः

(C) मम्मटः

(D) भोजराजः

**90.** ध्वन्यालोके अङ्गनासु लावण्यमिव विभाति

(A) लक्षणा

(B) प्रतीयमानध्वनिः

(C) शाब्दीभावना

(D) अलंकृतिः

**91.** काव्यशास्त्रीयं तथ्यं प्रस्तौति

(A) अग्निपुराणम्

(B) विष्णुपुराणम्

(C) नारदपुराणम्

(D) स्कन्दपुराणम्

**92.** भागवतपुराणे कति श्लोकाः सन्ति?

(A) 15000

(B) 18000

(C) 16000

(D) 17000

**93.** ऋषेः पराशरस्य पुत्रः अस्ति

(A) वामदेवः

(B) विश्वामित्रः

(C) कृष्णद्वैपायनः

(D) वाल्मीकिः

**94.** मनुस्मृतौ कति अध्यायाः

(A) 12

(B) 15

(C) 18

(D) 22

**95.** याज्ञवल्क्यस्मृतौ क्षत्रियस्य कृते _________ दिव्यप्रयोगो विधीयते?

(A) जलम्

(B) विषम्

(C) अग्निः

(D) तुला

**96.** 'देवानां प्रियः' कस्योपाधिरस्ति?

(A) चन्द्रगुप्तस्य

(B) समुद्रगुप्तस्य

(C) कनिष्कस्य

(D) अशोकस्य

**97.** सर्वविद्यानां प्रदीपः भवति–

(A) त्रयी

(B) वार्त्रा

(C) आन्वीक्षिकी

(D) दण्डनीतिः

**98.** मनुस्मृतौ द्वितीयाध्यायस्य प्रतिपाद्यविषयः कः?

(A) संस्कारः

(B) राजधर्मः

(C) जगदुत्पत्तिः

(D) वानप्रस्थविधिः

**99.** याज्ञवल्क्यस्मृत्यनुसारं सगोत्रेण इतरेण वा उत्पन्नः पुत्रः भवति

(A) पुत्रः

(B) औरसः

(C) क्षेत्रजः

(D) गोलकः

**100.** ब्राह्मीलिप्याम् अक्षरं नास्ति–

(A) ङ

(B) ञ

(C) ण

(D) न

**Space for Rough Work**

**Space for Rough Work**

**Space for Rough Work**

**Space for Rough Work**